# Panchabrahma Upanishad

# પઞ્ચબ્રહ્મોપનિષત્

## Document Information

Text title : Panchabrahma Upanishad

File name : panchabrahma.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 93 / 108; Krishna Yajurveda - shaiva upanishad

Latest update : February 24, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 2, 2024

*sanskritdocuments.org*

# પઞ્ચબ્રહ્મોપનિષત્

બ્રહ્માદિપઞ્ચબ્રહ્માણો યત્ર વિશ્રાન્તિમાપ્નુયુઃ ।
તદખણ્ડસુખાકારં રામચન્દ્રપદં ભજે ॥

ૐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥

અથ પૈપ્પલાદો ભગવાન્ભો કિમાદૌ કિં જાતમિતિ । સદ્યોજાતમિતિ ।
કિં ભગવ ઇતિ । અઘોર ઇતિ । કિં ભગવ ઇતિ । વામદેવ ઇતિ ।
કિં વા પુનરિમે ભગવ ઇતિ । તત્પુરુષ ઇતિ । કિં વા પુનરિમે ભગવ ઇતિ ।
સર્વેષાં દિવ્યાનાં પ્રેરયિતા ઈશાન ઇતિ । ઈશાનો ભૂતભવ્યસ્ય
સર્વેષાં દેવયોગિનામ્ । કતિ વર્ણાઃ । કતિ ભેદાઃ । કતિ શક્તયઃ ।
યત્સર્વં તદ્ગુહ્યમ્ । તસ્મૈ નમો મહાદેવાય મહારુદ્રાય પ્રોવાચ
તસ્મૈ ભગવાન્મહેશઃ ।
ગોપ્યાદ્ગોપ્યતરં લોકે યદ્યસ્તિ શ્રુણુ શાકલ ।
સદ્યોજાતં મહી પૂષા રમા બ્રહ્મા ત્રિવૃત્સ્વરઃ ॥ ૧॥

ઋગ્વેદો ગાર્હપત્યં ચ મન્ત્રાઃ સપ્તસ્વરાસ્તથા ।
વર્ણં પીતં ક્રિયા શક્તિઃ સર્વાભીષ્ટફલપ્રદમ્ ॥ ૨॥

અઘોરં સલિલં ચન્દ્રં ગૌરી વેદ દ્વિતીયકમ્ ।
નીર્દાભં સ્વરં સાન્દ્રં દક્ષિણાગ્નિરુદાહૃતમ્ ॥ ૩॥

પઞ્ચાશદ્વર્ણસંયુક્તં સ્થિતિરિચ્છક્રિયાન્વિતમ્ ।
શક્તિરક્ષણસંયુક્તં સર્વાઘૌઘવિનાશનમ્ ॥ ૪॥

સર્વદુષ્ટપ્રશમનં સર્વૈશ્વર્યફલપ્રદમ્ ।

વામદેવ મહાબોધદાયકં પાવનાત્મકમ્ ॥ ૫॥

વિદ્યાલોકસમાયુક્તં ભાનુકોટિસમપ્રભમ્ ।
પ્રસન્નં સામવેદાખ્યં નાનાષ્ટકસમન્વિતમ્ ॥ ૬॥

ધીરસ્વરમધીનં ચાવહનીયમનુત્તમમ્ ।
જ્ઞાનસંહારસંયુક્તં શક્તિદ્વયસમન્વિતમ્ ॥ ૭॥

વર્ણં શુક્લં તમોમિશ્રં પૂર્ણબોધકરં સ્વયમ્ ।
ધામત્રયનિયન્તારં ધામત્રયસમન્વિતમ્ ॥ ૮॥

સર્વસૌભાગ્યદં નૃણાં સર્વકર્મફલપ્રદમ્ ।
અષ્ટાક્ષરસમાયુક્તમષ્ટપત્રાન્તરસ્થિતમ્ ॥ ૯॥

યત્તત્પુરુષં પ્રોક્તં વાયુમણ્ડલસંવૃતમ્ ।
પઞ્ચાગ્નિના સમાયુક્તં મન્ત્રશક્તિનિયામકમ્ ॥ ૧૦॥

પઞ્ચાશત્સ્વરવર્ણાખ્યમથર્વવેદસ્વરૂપકમ્ ।
કોટિકોટિગણાધ્યક્ષં બ્રહ્માણ્ડાખણ્ડવિગ્રહમ્ ॥ ૧૧॥

વર્ણં રક્તં કામદં ચ સર્વાધિવ્યાધિભેષજમ્ ।
સૃષ્ટિસ્થિતિલયાદીનાં કારણં સર્વશક્તિધૃક્ ॥ ૧૨॥

અવસ્થાત્રિતયાતીતં તુરીયં બ્રહ્મસંજ્ઞિતમ્ ।
બ્રહ્મવિષ્ણ્વાદિભિઃ સેવ્યં સર્વેષાં જનકં પરમ્ ॥ ૧૩॥

ઈશાનં પરમં વિદ્યાત્પ્રેરકં બુદ્ધિસાક્ષિણમ્ ।
આકાશાત્મકમવ્યક્તમોઙ્કારસ્વરભૂષિતમ્ ॥ ૧૪॥

સર્વદેવમયં શાન્તં શાન્ત્યતીતં સ્વરાદ્બહિઃ ।
અકારાદિસ્વરાધ્યક્ષમાકાશમયવિગ્રહમ્ ॥ ૧૫॥

પઞ્ચકૃત્યનિયન્તારં પઞ્ચબ્રહ્માત્મકં બૃહત્ ।
પઞ્ચબ્રહ્મોપસંહારં કૃત્વા સ્વાત્મનિ સંસ્થિતઃ ॥ ૧૬॥

સ્વમાયાવૈભવાન્સર્વાન્સંહૃત્ય સ્વાત્મનિ સ્થિતઃ ।
પઞ્ચબ્રહ્માત્મકાતીતો ભાસતે સ્વસ્વતેજસા ॥ ૧૭॥

આદાવન્તે ચ મધ્યે ચ ભાસસે નાન્યહેતુના ।
માયયા મોહિતાઃ શમ્ભોર્મહાદેવં જગદ્ગુરુમ્ ॥ ૧૮॥

ન જાનન્તિ સુરાઃ સર્વે સર્વકારણકારણમ્ ।
ન સન્દૃશે તિષ્ઠતિ રૂપમસ્ય પરાત્પરં પુરુષં વિશ્વધામ ॥ ૧૯॥

યેન પ્રકાશતે વિશ્વં યત્રૈવ પ્રવિલીયતે ।
તદ્બ્રહ્મ પરમં શાન્તં તદ્બ્રહ્માસ્મિ પરમં પદમ્ ॥ ૨૦॥

પઞ્ચબ્રહ્મ પરં વિદ્યાત્સદ્યોજાતાદિપૂર્વકમ્ ।
દૃશ્યતે શ્રૂયતે યચ્ચ પઞ્ચબ્રહ્માત્મકં સ્વયમ્ ॥ ૨૧॥

પઞ્ચધા વર્તમાનં તં બ્રહ્મકાર્યમિતિ સ્મૃતમ્ ।
બ્રહ્મકાર્યમિતિ જ્ઞાત્વા ઈશાનં પ્રતિપદ્યતે ॥ ૨૨॥

પઞ્ચબ્રહ્માત્મકં સર્વં સ્વાત્મનિ પ્રવિલાપ્ય ચ ।
સોઽહમસ્મીતિ જાનીયાદ્વિદ્વાન્બ્રહ્માઽમૃતો ભવેત્ ॥ ૨૩॥

ઇત્યેતદ્બ્રહ્મ જાનીયાદ્યઃ સ મુક્તો ન સંશયઃ ।
પઞ્ચાક્ષરમયં શમ્ભું પરબ્રહ્મસ્વરૂપિણમ્ ॥ ૨૪॥

નકારાદિયકારાન્તં જ્ઞાત્વા પઞ્ચાક્ષરં જપેત્ ।
સર્વં પઞ્ચાત્મકં વિદ્યાત્પઞ્ચબ્રહ્માત્મતત્ત્વતઃ ॥ ૨૫॥

પઞ્ચબ્રહ્માત્મિકીં વિદ્યાં યોઽધીતે ભક્તિભાવિતઃ ।
સ પઞ્ચાત્મકતામેત્ય ભાસતે પઞ્ચધા સ્વયમ્ ॥ ૨૬॥

એવમુક્ત્વા મહાદેવો ગાલવસ્ય મહાત્મનઃ ।
કૃપાં ચકાર તત્રૈવ સ્વાન્તર્ધિમગમત્સ્વયમ્ ॥ ૨૭॥

યસ્ય શ્રવણમાત્રેણાશ્રુતમેવ શ્રુતં ભવેત્ ।
અમતં ચ મતં જ્ઞાતમવિજ્ઞાતં ચ શાકલ ॥ ૨૮॥

એકેનૈવ તુ પિણ્ડેન મૃત્તિકાયાશ્ચ ગૌતમ ।
વિજ્ઞાતં મૃણ્મયં સર્વં મૃદભિન્નં હિ કાયકમ્ ॥ ૨૯॥

એકેન લોહમણિના સર્વં લોહમયં યથા ।
વિજ્ઞાતં સ્યાદથૈકેન નખાનાં કૃન્તનેન ચ ॥ ૩૦॥

સર્વં કાર્ષ્ણાયસં જ્ઞાતં તદભિન્નં સ્વભાવતઃ ।
કારણાભિન્નરૂપેણ કાર્યં કારણમેવ હિ ॥ ૩૧॥

તદ્રૂપેણ સદા સત્યં ભેદેનોક્તિર્મૃષા ખલુ ।
તચ્ચ કારણમેકં હિ ન ભિન્નં નોભયાત્મકમ્ ॥ ૩૨॥

ભેદઃ સર્વત્ર મિથ્યૈવ ધર્માદિરનિરૂપણાત્ ।
અતશ્ચ કારણં નિત્યમેકમેવાદ્વયં ખલુ ॥ ૩૩॥

અત્ર કારણમદ્વૈતં શુદ્ધચૈતન્યમેવ હિ ।
અસ્મિન્બ્રહ્મપુરે વેશ્મ દહરં યદિદં મુને ॥ ૩૪॥

પુણ્ડરીકં તુ તન્મધ્યે આકાશો દહરોઽસ્તિ તત્ ।
સ શિવઃ સચ્ચિદાનન્દઃ સોઽન્વેષ્ટવ્યો મુમુક્ષિભિઃ ॥ ૩૫॥

અયં હૃદિ સ્થિતઃ સાક્ષી સર્વેષામવિશેષતઃ ।
તેનાયં હૃદયં પ્રોક્તઃ શિવઃ સંસારમોચકઃ ॥ ૩૬॥

ઇત્યુપનિષત્ ॥

ૐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ પઞ્ચબ્રહ્મોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

---

*Panchabrahma Upanishad*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*